# .. yamAShTakam ..

## ॥ यमाष्टकम् ॥

तपसा धर्ममाराध्य पुष्करे भास्करः पुरा ।
धर्मं सूर्यः सुतं प्राप धर्मराजं नमाम्यहम् ॥ १॥
समता सर्वभूतेषु यस्य सर्वस्य साक्षिणः ।
अतो यन्नाम शमनं इति तं प्रणमाम्यहम् ॥ २॥
येनान्तश्च कृतो विश्वे सर्वेषां जीविनां परम् ।
कर्मानुरूपं कालेन तं कृतान्तं नमाम्यहम् ॥ ३॥
भिभर्ति दण्डं दण्डाय पापिनां शुद्धिहेतवे ।
नमामि तं दण्डधरं यश्शास्ता सर्वजीविनाम् ॥ ४॥
विश्वं च कलयत्येव यस्सर्वेषु च सन्ततम् ।
अतीव दुर्निवार्यं च तं कालं प्रणमाम्यहम् ॥ ५॥
तपस्वी ब्रह्मनिष्टो यः सम्यमी सन् जितेन्द्रियः ।
जीवानां कर्मफलदः तं यमं प्रणमाम्यहम् ॥ ६॥
स्वात्मारमश्च सर्वज्ञो मित्रं पुण्यकृतां भवेत् ।
पापिनां क्लेशदो नित्यं पुण्यमित्रं नमाम्यहम् ॥ ७॥
यज्जन्म ब्रह्मणोंशेन ज्वलन्तं ब्रह्मतेजसा ।
यो ध्यायति परं ब्रह्म तमीशं प्रणमाम्यहम् ॥ ८॥
यमाष्टकमिदं नित्यं प्रातरुत्ताय यः पटेत् ।
यमात् तस्य भयं नास्ति सर्वपापात् विमुच्यते ॥ ९॥

The above verses in praise of Lord Yama
- the god of death - are from Devi Bhagavatam (9-31).
Savitri asked many questions about the paths taken by jivas (souls) after death and Yama answers them in detail. In the course of his reply Yama described the glory of Devi. Savitri was very much pleased with the answers given by the god of death and in these verses praised him in gratitude.
The last verse says that those who recite the verses daily in the morning will be free from sins and also from fear of death.

Encoded and proofread by N.Balasubramanian bbalun@dataone.in

Please send corrections to sanskrit@cheerful.com
Last updated March 29, 2009